# संस्कृत वार्ता:

दिनाङ्क : 19.10.2026 सायम् : 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-न्यूजीलैण्ड्-देशयोः मध्ये मुक्तव्यापारसन्धिः श्वः प्रवर्तिष्यते।
- अमेरिकादेशस्य विदेशमन्त्री मार्को रुबियो उक्तवान् यत् भारत-अमेरिका-देशयोः मध्ये व्यापारसन्धिः शीघ्रमेव अन्तिमरूपं प्राप्स्यति।
- भारतेन OIC इति इस्लामिक-सहकार-सङ्घस्य प्रस्तावेषु भारतविरोधिवचनानि प्रत्याख्यातानि तथा पाकिस्तानः मिथ्याप्रचाराय आरोपितः।
- रक्षामन्त्री राजनाथसिंहः शङ्घाई-सहकार-सङ्घस्य शासनाध्यक्षाणां परिषदः उपवेशने भागं ग्रहीतुं ताजिकिस्तानदेशं प्रति प्रस्थितवान्।
- अपि च, निषादकुमारः एशिया-पैरा-क्रीडास्पर्धासु भारताय पैरा-एथलेटिक्स् इत्यस्मिन् प्रथमं स्वर्णपदकं विजितवान्।

---------------------------------------------------

<u>गोयलः - भारत-न्यूजीलैण्ड्-मुक्तव्यापारसन्धिः</u>

भारत-न्यूजीलैण्ड्देशयोः मध्ये मुक्तव्यापारसन्धिः श्वः प्रवर्तिष्यते। अनेन प्रतिज्ञापत्रेण भारतात् न्यूजीलैण्ड्देशं प्रति निर्याततितानां सर्वेषां वस्तूनां शुल्कमुक्तप्रवेशः सुलभः भविष्यति। अद्य नवदिल्ल्यां भारत-न्यूजीलैण्ड्-मुक्तव्यापारसन्धेः प्रवर्तनस्य उपलक्ष्ये आयोजिते समारोहे वाणिज्योद्योगमन्त्री पीयूषगोयलः अवदत् यत् अयं सन्धिः प्रधानमन्त्रिणः नरेन्द्रमोदिनः 'विकसितभारत-विंशति-सप्तचत्वारिंशत्' इत्यस्य अनुरूपमेव अस्ति। सः अवदत् यत् अनेन सन्धिना भारतस्य निर्यातकेभ्यः, विशेषतया सूक्ष्म-लघु-मध्यमोद्यमेभ्यः, शिल्पिभ्यः, कृषकेभ्यः अथ औषधिक्षेत्रेभ्यः च नूतनाः अवसराः उद्घाटिताः भविष्यन्ति।

मन्त्रिणा सूचितं यत् उभौ देशौ त्रिंशदधिक-द्विसहस्र-तमवर्षपर्यन्तं न्यूजीलैण्ड्देशेन सह वस्तूनां सेवायाश्च द्विपाक्षिकव्यापारं द्विगुणीकृत्य प्रायः पञ्चत्रिंशत्सहस्र-कोटिरूप्यकाणि यावत् नेतुं लक्ष्यं

निर्धारितवन्तौ। भारत-न्यूजीलैण्ड्-देशयोः मध्ये अस्मिन् मुक्तव्यापारसन्धौ अस्यैव वर्षस्य एप्रिलमासे नवदिल्ल्यां भारतमण्डपम इत्यत्र हस्ताक्षराणि जातानि आसन्।

---------------------------------------------------

<u>राजनाथसिंहः</u>

रक्षामन्त्री राजनाथसिंहः अद्य शङ्घाई-सहकार-सङ्घस्य शासनाध्यक्षाणां परिषदः पञ्चविंशतितमे उपवेशने भारतस्य प्रतिनिधित्वं कर्तुं ताजिकिस्तानदेशस्य दुशान्बेनगरं प्रति प्रस्थितवान्। द्विदिवसीयस्य अस्य उपवेशनस्य सदस्यदेशानां मध्ये व्यापार-अर्थव्यवस्था-निवेश-सम्पर्कव्यवस्था-नवाचार-सांस्कृतिकविनिमयादिषु क्षेत्रेषु सहयोगस्य सुदृढीकरणे विशेषं ध्यानं प्रदीयते। उपवेशने प्रचलितानां सहयोगसम्बद्धानां योजनानां समीक्षा अपि भविष्यति। सङ्घस्य वित्तीय- संस्थासम्बद्ध-कार्यप्रणाल्योः सम्बद्धनिर्णयाः अपि विचाराधीनाः भविष्यन्ति।

---------------------------------------------------

<u>दुर्गापूजा - महाष्टमी तथा महानवमी</u>

अद्य अशेषेऽपि देशे महाष्टमी-महानवमीपर्वणी श्रद्धाभक्तिभ्यां सह आचर्येते। दुर्गादेव्याः पूजार्चनार्थं प्रातःकालादेव विशेषपूजाः धार्मिकानुष्ठानानि च प्रारब्धानि। देव्याः दर्शनं कृपाशीर्वादं च प्राप्तुं बहवः श्रद्धालवः देवालयेषु पूजामण्डपेषु च समागच्छन्ति। पश्चिमबङ्गालराज्ये अष्टमीपूजानन्तरम् अञ्जलिः सन्धिपूजा च अनुष्ठिते। अस्मिन् अवसरे भगवत्याः दुर्गायाः महागौरीस्वरूपस्य अर्चना क्रियते। बेलूरमठे, रामकृष्णमठोपक्रमस्य अन्यासु शाखासु अथ अनेकासु सामुदायिक-पारिवारिक-पूजास्थलेषु च कुमारीपूजा अनुष्ठीयते। उत्तरप्रदेशे महानवम्याः अवसरे बहवः श्रद्धालवः देवालयेषु शक्तिपीठेषु च दर्शनार्थं गच्छन्ति। मिर्जापुर-स्थिते माताविन्ध्यवासिनीधाम्नि ह्यः पञ्चविंशतिलक्षाधिकाः श्रद्धालवः दर्शनम् अकुर्वन्। अद्यापि तावन्तः श्रद्धालवः गमिष्यन्तीति सम्भाव्यते। राज्ये सर्वत्र प्रायः पञ्चचत्वारिंशत्सहस्राणि दुर्गापूजामण्डपानि स्थापितानि सन्ति। प्रशासनद्वारा श्रद्धालूनां सौविध्याय विस्तृताः व्यवस्थाः कृताः सन्ति। मुख्यमन्त्री योगी आदित्यनाथः गोरखनाथमन्दिरे कुमारीपूजनम् कृतवान् तथा सनातनपरम्परायां महिलानां सम्मानस्य गौरवस्य च महत्त्वम् प्रतिपादितवान्। राष्ट्रपतिः द्रौपदीमुर्मुः प्रधानमन्त्री नरेन्द्रमोदी च दुर्गापूजापर्वणः अवसरे शुभकामनाः प्रदत्तवन्तौ। राष्ट्रपतिः

अवदत् यत् एतत् पर्व भारतस्य समृद्ध-आध्यात्मिक-परम्परायाः, संस्कृतेः, कलायाः च प्रतीकम् अस्ति। प्रधानमन्त्री महाष्टम्याः अवसरे महागौरीदेव्याः पूजार्चनाम् अकरोत्।

---

## रुबियो – व्यापारसन्धिः

अमेरिकादेशस्य विदेशमन्त्री मार्को रुबियो उक्तवान् यत् भारत-अमेरिका-देशयोः मध्ये व्यापारसन्धिः शीघ्रमेव अन्तिमरूपं प्राप्स्यति। उज्बेकिस्तानस्य समरकन्दनगरे वार्ताहरैः सह सम्भाषमाणः रुबियो रूसदेशात् तैलस्य प्राकृतिकवायोः च आयातं कुर्वद्भ्यः देशेभ्यः प्रतिबन्धेषु अल्पकालिकं शैथिल्यं दातुं वाशिङ्गटन् इत्येतस्य निर्णयस्य अपि समर्थनम् अकरोत्। असौ कथितवान् यत्, अस्य पदक्षेपस्य उद्देश्यं वैश्विकोर्जापूर्तौ मूल्येषु च विद्यमानां प्रतिकूलस्थितिं न्यूनीकरणम् अस्ति। सः अवदत् यत् प्रत्येकं देशं स्वकीयपरिस्थितिभ्यः, भौगोलिकस्थितेः अथ वैकल्पिक-आपूर्तिकर्तृभ्यः च ऊर्जाप्राप्तौ विद्यमानासु समस्यासु विचारं कुर्यात्। विदेशनीतिसम्बद्ध-निर्णयसमये एतेषां कारकाणां मूल्याङ्कनम् आवश्यकम् इति रुबियो प्रतिपादितवान्। रुबियो श्वः मुम्बईनगरं गमिष्यति, यत्र सः विदेशमन्त्रिणा डॉ. एस्. जयशङ्करेण सह मिलिष्यति। अस्य सप्ताहस्य उत्तरार्धे तस्य जामनगरस्य यात्रायाः सम्भावना अपि अस्ति।

---

## पोलैण्डदेशस्य प्रधानमन्त्रिणः भारतयात्रा

पोलैण्डदेशस्य प्रधानमन्त्री डोनल्ड् टस्क् बुधवासरात् भारतस्य त्रिदिवसीययात्रायां भविष्यति। अस्यां यात्रायां सः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह द्विपक्षीयसम्बन्धानां, व्यापार-रक्षा-उदयमानप्रौद्योगिकीनां क्षेत्रेषु सहयोगस्य सुदृढीकरणविषये चर्चां करिष्यति। प्रधानमन्त्रिणः मोदिनः निमन्त्रणे सति भारतम् आगच्छता टस्क् इत्यनेन सह पोलैण्डदेशस्य वित्त-अर्थव्यवस्थामन्त्री आन्द्रेज-डोमान्स्की तथा व्यापारप्रतिनिधिमण्डलम् अपि आगमिष्यति। उभौ नेतारौ गुरुवासरे भारत-पोलैण्ड-देशयोः सम्बन्धानां विविधपक्षाणां समीक्षां करिष्यतः तथा क्षेत्रीयवैश्विकविषयेषु विचारविनिमयं करिष्यतः।

टस्क् इत्येषः बेङ्गलूरुनगरम् अपि गमिष्यति, यत्र असौ सूचनाप्रौद्योगिकी-अन्तरिक्षक्षेत्रयोः प्रतिनिधीन् समेत्य विभिन्नव्यापारक्षेत्रेषु कार्यरतैः जनैः सह मिलिष्यति। भारत-पोलैण्ड-व्यापारमञ्चस्य उपवेशनानि अक्टूबरमासस्य द्वाविंशति-दिनाङ्के नवदिल्ल्यां तथा त्रयोविंशति-दिनाङ्के बेङ्गलूरुनगरे आयोजयिष्यन्ते। विदेशमन्त्रालयस्य अनुसारम्, एषा यात्रा भारत-पोलैण्ड-देशयोः रणनीतिक-सहमतिं सुदृढां करिष्यति तथा व्यापार-निवेश-रक्षा-उदयमानप्रौद्योगिकीषु, नवीकरणीयोर्जा-शिक्षा-संस्कृतिषु तथा उभयदेशस्य जनानां मध्ये पारस्परिकसम्बन्धेषु सहयोगं वर्धयिष्यति। एतया भारत-यूरोपीय-सङ्घयोः रणनीतिक-सहमतिम् अपि अधिका सुदृढा भविष्यति।

---------------------------------------------------

<u>एशिय-पैरा-क्रीडास्पर्धाः</u>

एशिया-पैरा-क्रीडास्पर्धासु निषादकुमारः भारताय पैरा-एथलेटिक्स् इत्यस्मिन् प्रथमं स्वर्णपदकं प्राप्तवान्। सः जापानदेशस्य आइचि-नागोयानगरे पुरुषाणां टी47 इत्यस्य वर्गस्य दीर्घकूर्दनस्पर्धायां एकम् एकं दशांशोत्तर सप्त मीटर्-मितेन सर्वश्रेष्ठकूर्दनेन सहैव स्वर्णपदकं विजितवान्। स्वीय प्रथमायां प्रतिस्पर्धात्मक-दीर्घकूर्दन-स्पर्धायां भागं गृह्णन् द्विवारं पैरालिम्पिक-क्रीडास्पर्धायां रजतपदकविजेता निषादः उज्बेकिस्तानदेशस्य ओमादबेक-खासानोव इत्येतम् अथ श्रीलङ्कादेशस्य मोहम्मदु-सफरान इत्येतं च पराजितवान्।

महिलानां पञ्चदशमीटर्-मितस्य टी12/टी13 इत्यस्यां स्पर्धायां सौम्या स्वर्णपदकं विजितवती, तत्रैव राधा वेङ्कटेश् च रजतपदकं प्राप्तवती। पुरुषाणां कुन्तकक्षेप-स्पर्धायां रिङ्कूः स्वर्णपदकं, अजीतसिंहः च रजतपदकं प्राप्तवान्। एवं भारतम् उभयोः स्पर्धयोः स्वर्णरजतपदके प्राप्तवत्।

।। इति वार्ता: ।।